International Journal of Sanskrit Research 2020; 6(2): 280-286

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(2): 280-286
© 2020 IJSR
www.anantaajournal.com
Received: 12-01-2020
Accepted: 14-02-2020

**अर्पितानाथः**
संस्कृतविभागः
बासन्तीदेवी महाविद्यालयः
पश्चिमबङ्गः

# अभिज्ञानशकुन्तले निर्वाचितार्थालंकारविश्लेषणम्

**अर्पितानाथः**

**संक्षिप्तिका**
भारतीयसाहित्यजगति ये ये कवयः लब्धप्रतिष्ठः तेषु कविषु महाकविः कालिदासः श्रेष्ठरिति सर्वजनमनोऽभिरामप्रवादः प्रसिद्धोऽस्ति। कालिदासस्य कवित्वशक्तिः सर्वजनविदितैव। तस्य कृतिर्यथा ऋतुसंहारः, मेघदूतम्, कुमारसम्भवम्, रघुवंशम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशकुन्तलञ्च। कवेः सर्वासु रचनासु अभिज्ञानशकुन्तलमिति नाटकं प्रधानतममिति प्रसिद्धम्। अभिज्ञानशकुन्तलमिति नाटकस्य रचनाविषये महाकवेः कालिदासस्य सर्वाधिका प्रसिद्धिर्वर्तते। उपमालंकारप्रयोगे कालिदासस्य सर्वाधिका ख्यातिर्वर्तते। उक्तञ्च- उपमा कालिदासस्य। अर्थालंकारेषु उपमा अन्यतमा। विश्वनाथाचार्यः साहित्यदर्पणमिति ग्रन्थे दशमे परिच्छेदे अर्थालंकारालोचनायाः प्रारम्भे उपमालंकारस्य लक्षणं प्रदत्तवान्। विरुद्धधर्ममनुल्लिख्य एके वाक्ये यदि द्वयोर्विसदृशपदार्थयोर्मध्ये साम्यं वाच्यं स्यात् तर्हि तत्र उपमालंकारो भवति। उपमालंकारस्य चतुर्विधानि अङ्गानि भवन्ति – उपमेयोपमानं साधारणधर्मः सादृश्यवाचकशब्दश्च। पूर्णोपमा-लुप्तोपमा-श्रौती-आर्थीभेदेन उपमा चतुर्विधा। अतएव कविः तस्य रचनायाः सौन्दर्यवृद्ध्यर्थमलंकारप्रयोगे सचेष्टो भवेदिति भावः। कविः कालिदासोऽपि तस्य रचनासु विविधानां शब्दालंकारानामर्थालंकाराणाञ्च व्यवहारं कृतवान्। येन तस्य रचना सौन्दर्यशाली अभवत्। यद्यपि संख्याविचारेण उपमालंकारप्रयोगः नाधिकः, तथापि वर्णनामाधुर्येण उपमालंकारसमन्विताः श्लोका अनवद्या इति। अतएव अभिज्ञानशकुन्तले निर्वाचितार्थलंकारविश्लेषणं प्रबन्धस्यास्य मुख्यतममुद्देश्यम्।

**मूलशब्दावली –** कविः, काव्यम्, अलंकारः, साधर्म्यम्, उपमेयः, उपमानम्।

## प्रस्तावना

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथा ते रोचते विश्वं तथेदं परिवर्तते।।[1]

काव्यजगति कविरेव सृष्टिकर्ता ब्रह्मासदृशः। स स्वीयप्रतिभावलेन उत्तमकाव्यं सृजति। यथा वङ्गीयसाहित्यजगति रवीन्द्रनाथः कविशिरोमणिः, तथैव संस्कृतसाहित्यजगति कालिदास आसीत् सूर्यसमः। कालिदासस्य कविप्रतिभाप्रसङ्गेन कथ्यते – 'उपमा कालिदासस्य'। कालिदासतुल्यमुपमाप्रयोगनैपुण्यं कस्यापि रचनायां न दृश्यते। ईदृशः कविः कालिदासः त्रीणि नाटकानि, महाकाव्यद्वयं गीतिकाव्यद्वयञ्च रचितवान्। एतेषां रचनानाम् अभिज्ञानशकुन्तलमिति नाटकम् अन्यतमम्। उक्तञ्च - 'कालिदासस्य सर्वस्वमभिज्ञानशकुन्तलम्'। कालिदासस्य रचनायां विविधानामलंकाराणां प्रयोगः दृश्यते। स तस्य अभिज्ञानशकुन्तलमिति नाटके वहुविधेनालंकारप्रयोगेण काव्यसौन्दर्यं साधयति।

## अलंकारशब्दस्य व्युत्पत्तिर्लक्षणञ्च-

अलंकारप्रयोगेण काव्यशोभां वर्धते। 'अलम्'-इति शब्दात् 'अलंकार'-शब्दः निष्पद्यते। 'भूषणम्' हि 'अलम्' इति शब्दस्यार्थः। येन अलंक्रियते स एव अलंकार इति। अलंकारविषये प्राचीना आलंकारिकाः विशदरूपेण आलोचितवन्तः। दण्डिमतेन अलंकारस्य संज्ञा यथा– 'काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते'।[2] एतदेव

**Corresponding Author:**
**अर्पितानाथः**
संस्कृतविभागः
बासन्तीदेवी महाविद्यालयः
पश्चिमबङ्गः

[1] अग्निपुराणम्-340/10
[2] काव्यादर्शः,२/१

अलंकारस्य सामान्यलक्षणम्। येन काव्यगतं सर्वविधमेव सौन्दर्यं बोध्यते। दण्डीमतानुसारेण काव्यान्तर्गताः गुणा एव काव्यस्य अलंकारः। पुनश्च अनुप्रासोपमादयः हि काव्यस्य विशेषालंकाराः।
काव्ये अलंकारविषये काव्यस्य सौन्दर्यविधानविषये वा काव्यालंकारसुत्रवृत्तिकारः वामनः विशदतया आलोचितवान्। तेन अलंकारस्य संज्ञा विधीयते यथा – 'सौन्दर्यमलंकारः'[3] - काव्यस्य सौन्दर्यमेवालंकारः। पुनः वामनेन तस्य ग्रन्थस्य वृत्त्यंशे स्पष्टीक्रियते – 'अलंकृतिरलंकारः'। करणव्युत्पत्त्या पुनरलंकारशब्दोऽयमुपमादिषु वर्तते'।[4] तस्य मतेन अलंकारस्य द्विविध अर्थः। साधारणार्थः यथा – काव्यस्य सौन्दर्यविधायकः धर्मः, विशेषार्थ अनुप्रासोपमादयः शब्दालंकारैरर्थालंकारैश्च विशेषतया काव्यस्य सौन्दर्यविधायको वहिरङ्गः धर्मः। यैः काव्यशोभां वर्धते। साहित्यदर्पणकारेण विश्वनाथेनोक्तम् – 'काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादय इव, दोषाः काणत्वादिवत्, रीतयः अवयवसंस्थानविशेषवत्, अलंकाराश्च कटककुण्डलादिवत्'।[5] आचार्यः भामहोऽपि अलंकारविषये उक्तवान्-

'रूपकादिः अलंकारस्तस्यान्यैर्वहुधोदितः।
न कान्तमपि निर्भूषं विभाति वनिताननम्'।।[6]

अर्थात् काव्ये अलंकाराः हि रूपकादयः। यथा सुन्दरी वनिता अलंकारविहीना न शोभते तथैव अलंकारविहीनं काव्यं सौन्दर्यशालिनं न भवति। अतएव काव्यस्य सौन्दर्यवृद्ध्यर्थमलंकारस्य भूमिका सर्वैव आलंकारिकाः स्वीकुर्वन्ति। अलंकारशास्त्रसम्मतविधिना संस्कृतकाव्ये नाटके च अलंकारप्रयोगबाहुल्यं परिलक्ष्यते।

**अर्थालंकारविश्लेषणम्**
अलंकारेष्वर्थलंकाराः विविधाः। तेषु उपमालंकारः सर्वालंकाराणां प्राणस्वरूपः। आलंकारिकेण अप्पयदीक्षितमतेन –

'उपमैका शैलूषी संप्राप्ता चित्रभूमिकाभेदान् ।
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः'।।[7]

विश्वनाथाचार्यः साहित्यदर्पणमिति ग्रन्थे दशमे परिच्छेदे अर्थालंकारालोचनायाः प्रारम्भे उपमालंकारस्य लक्षणं प्रदत्तवान्। तद् यथा – 'साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमाद्वयोः'।[8] विरुद्धधर्ममनुल्लिख्य एके वाक्ये यदि द्वयोर्विसदृशपदार्थयोर्मध्ये साम्यं वाच्यं स्यात् तर्हि तत्र उपमालंकारो भवति। उपमालंकारस्य चतुर्विधानि अङ्गानि भवन्ति – उपमेयोपमानः साधारणधर्मः सादृश्यवाचकशब्दाश्च। पूर्णोपमा-लुप्तोपमा-श्रौती-आर्थीभेदेन उपमा चतुर्विधा।
अतएव कविः तस्य रचानायाः सौन्दर्यवृद्ध्यर्थम् अलंकारप्रयोगे सचेष्टो भवेदिति भावः।

**अभिज्ञानशकुन्तलमिति नाटकस्य अङ्कानुसारेण उपमालंकारसमीक्षा :- प्रथमाङ्कः**

नाटकस्य प्रथमेऽङ्के एकत्रिंशत् श्लोका विद्यन्ते। तत्र उपमालंकारयुक्ताः श्लोकाश्च पञ्चसंख्यकाः। ते यथा – १/५, १/१०, १/१९, १/२९, १/३१ च श्लोकाः।
प्रथमान्तर्गते पञ्चमे श्लोके नाटकस्य प्रस्तावनांशे सूत्रधारानुरोधेन नटी संगीतं गीतवती।
तत्परं सूत्रधारः तां प्रशंसितवान् –

तवास्मि गीतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा।।[9]

अर्थात् तव संगीतमाधुर्येन अहमेतादृशः मुग्धोऽभवं यथा नृपः दुष्यन्तः मृगयार्थं हरिणेनाकृष्टोऽभवत्। अत्र सूत्रधारस्य स्थितिना सह दुष्यन्तस्य तुलनयोपमालंकारोऽभवत्।
उपमालंकारस्य द्वितीयः दृष्टान्तः यथा – दुष्यन्तस्य कण्वाश्रमप्रवेशकाले। यदा राजा हरिणं हन्तुमुद्यतोऽभवत् तदा वैखानसः तं निषिध्योक्तवान् –

न खलु न खलु वाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तुलाराशाविवाग्निः।
क्व वत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरस्ते।।[10]

अत्र हरिणशिशुना सह तुलाराशि-सादृश्यकथनात् तथा राज्ञः वाणेन सह अग्नेः तुलनावशादुपमालंकारः स्यात्।
तृतीयोदाहरणं यथा –

अधरः किसलयरागः कोमलविटपानुकारिणौ वाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु संनद्धम् ।।[11]

कण्वाश्रमं प्रविश्यानिन्द्यसुन्दरीं शकुन्तलां सखिद्वयाभ्यां सह अवलोक्य नृपः दुष्यन्तः मुग्धोऽभवत्। नायिकायाः रूपलावण्येन मुग्धः राजा दुष्यन्तः तस्याः वर्णनाप्रसङ्गेन इदमुक्तवान्। अत्र शकुन्तलाया अधरं वाहुद्वयं दैहिकसौन्दर्यञ्चोपमेयाः तथा किसलयः अतीव कोमलवृक्षशाखा कुसुमञ्चोपमानसमूहः। वस्तुतस्तु शकुन्तलायाः यौवनं कुसुममिव लोभनीयमिति वर्णनाप्रसङ्गेनात्रोपमालंकारः।
प्रथमाङ्कान्तर्गतोपमालंकारसमन्वितः चतुर्थश्लोकः यथा -

तुरगखुरस्तथा हि रेतुर्विटपविषक्तजलार्द्रवल्कलेषु ।
पतति परिणतारुणप्रकाशः शलभसमूह इवाश्रमद्रुमेषु।।[12]

सूर्यास्तसमये आश्रमवर्णनाप्रसङ्गेन श्लोकोऽयं लभ्यते। अत्र वर्ण्यते – राजा दुष्यन्त आश्रमसन्निहित इत्याश्रमिकाः घोषयन्ति। दुष्यन्तस्य सेनानां तुरगैः खुरोत्थितो रजरेणु आश्रमवृक्षेषु पततीति योजना। इत्थमाश्रमपरिवेशः धूलिपूर्णो भवतीति भावः। अत्र 'तुरगखुरहत' इत्यनेन शब्देन सेनाया वाहुल्यं ध्वनितम्। कीदृशः रेणुरिति वर्णितोऽस्त्युपमामुखेन - 'परिणतारुणप्रकाश इति। परिणतः सायंकालीनो योऽयमरुणः सूर्यस्तद्वत्प्रकाश अस्फुटः तद्वद्वर्ण इत्यर्थः।[13] अनया रेर्णोवाहुल्यं घनत्वञ्चाभिव्यजते। अत्रोपमेयः – 'रेणुः' उपमानञ्च 'परिणतारुणप्रकाशः', 'इव' सादृश्यवाचकशब्दः। अतएवात्रोपमालंकारः।
पञ्चमोपमा यथा –

[3] काव्यालंकारसूत्रवृत्तिः, १/१/२
[4] तदेव वृत्यंशे,१/१/२
[5] साहित्यदर्पणम्,१/१३
[6] काव्यालंकारः १/१३
[7] द्रष्टव्यम् , अलंकारविचिन्ता, विपदभञ्जन पाल, पृष्ठा-२८
[8] साहित्यदर्पणम्, १०/१४
[9] अभिज्ञानशकुन्तलम्, १/५
[10] तदेव, १/१०
[11] तदेव, १/१९
[12] तदेव, १/२९
[13] तदेव,२/२९, राघवभट्टकृता अर्थद्योतनिकाटीका

गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य।।[14]

प्रथमाङ्कस्यान्तिमश्लोकोऽयम्। नायिकां शकुन्तलां प्रति गभीरानुरक्तस्य दुष्यन्तस्य चञ्चलचित्तमुपमीयतेऽत्र - वायोराघातेन नीयमानेन ध्वजस्य चीनांशुकेन सह। दुष्यन्तस्य शरीरं यद्यपि तपोवनात् सम्मुखे गच्छति तथापि तस्य चेतः पुनः पश्चात् शकुन्तलाभिमुखं धावति। अनया वर्णनया राज्ञः चित्तचाञ्चल्यं तथा हृदयशून्यत्वं ध्वनितम्। अत्रोपमायाः प्रकृष्टोदाहरणं दृश्यते। येन कालिदासस्योपमाप्रयोगनैपुण्यं प्रकाशितम्।

**द्वितीयाङ्कः**
अस्मिन्नङ्के विंशतिसंख्यकाः श्लोकाः विद्यन्ते। तत्रोपमालंकारप्रयोगः दृश्यते पञ्चसंख्यके श्लोके। यथाक्रमेण ते यथा- २/४, २/७, २/८, २/१५, २/१७ श्लोकाश्च।
तत्र प्रथमोपमा यथा –

अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं रविकिरणसहिष्णु स्वेदलेशैरभिन्नम् ।
अपचितमपि गात्रं व्यायतत्वादलक्ष्यं गिरिचर इव नागः प्राणसारं बिभर्ति।।[15]

श्लोकेऽस्मिन् राज्ञः दुष्यन्तस्य सेनापतिः तं मृगयायाः माहात्म्यं वर्णयति। तन्मतेन मृगयया दैहिकवलं वर्धते। धनुचालनायां पारदर्शिताऽपि आगच्छति। गिरिचर इव शक्तिरागच्छतीति। वनहस्तिना सह मृगयारतः व्यक्ति उपमीयते। अतएवात्र उपमालंकारः स्यात्।
द्वितीयोपमा यथा –

शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोऽभिभवाद्वमन्ति।।[16]

पुनः मृगयागमने अनासक्तः नृपः दुष्यन्तः तपोवनात् राजसैन्यमपसारयितुं सेनापतिमादिष्टवान्। आश्रमवासिषु मुनिषु प्रच्छन्नः तेज विद्यते। तद्धेतुना राजा सतर्कीकरणायेदमुक्तवान्। अत्र तपोधनेन ऋषिणा सह सुर्यकान्तमणेः तुलनायामुपमालंकारः स्यादिति। ऋषिरत्रपमेयः, उपमानश्च सुर्यकान्तमणिः, साधारणधर्म च प्रच्छन्नः तेजः।
उपमायाः तृतीयोदाहरणं यथा –

सुरयुवतिसम्भवं किल मुनेरपत्यं तदुज्झिताधिगतम्।
अर्कस्योपरि शिथिलं च्युतमिव नवमालिकाकुसुमम् ।।[17]

विदूषकं निकषा श्कुन्तलावस्थां वर्णयन् दुष्यन्तस्योक्तिरियम्। तपोवनाश्रमे कठोरनियमपरिपालनेन पालिता कोमला शकुन्तला। तस्या एतादृश्यवस्था वर्णनाप्रसङ्गेन दुष्यन्तेनाह – 'अर्कस्योपरि शिथिलं च्युतमिव नवमालिकाकुसुमम्'। शकुन्तलाया अतीव पेलवतोपमीयते नवमालिकाकुसुमेन सह । अत्र सुरयुवतिः नवमालिका चेति स्त्रीलिङ्गवाचकशब्देन शकुन्तलायाः माता मेनकाभिव्यजते । मुनि अर्कश्च शब्दद्वयेन तस्याः पितावगम्यते। शकुन्तलायाः जन्मवृत्तान्तस्येदृशी काव्यगतवर्णनातुलनीया। उपमाप्रयोगेन कवि अपुर्वकाव्यसौन्दर्यं साधयति।

चतुर्थोपमा यथा-

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति।[18]

अत्र कण्वस्य वार्तावाहकरूपेण ऋषिकुमारद्वय आगच्छति दुष्यन्तं निकषा। राज्ञः वीरत्वं वर्णयन् तौ इदमुक्तवन्तौ। तयो वचननुसारेण राज्ञः दुष्यन्तस्य वीरत्वव्यञ्जकं वाहुद्वयं नगरस्य प्रवेशद्वारेण सहोपमीयते। यथा नगरस्य प्रवेशद्वारं कठोरं तथैव राजा दुष्यन्तोऽपि शक्तिमानिदमवबोधनायेदृशी तुलना दृश्यते। अतएवात्रोपमालंकारः।
अङ्कस्यास्य अन्तिमोपमा यथा –

कृत्ययोर्भिन्नदेशत्वाद् द्वैधीभवति मे मनः।
पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा ।।[19]

अत्र दुष्यन्तस्य मानसिकद्वन्द्वस्य तुलना क्रियते पर्वतेन वाधाप्राप्तेन नदीस्रोतेन सह। एकतः राक्षसहस्तादाश्रमवासीनां रक्षणरूपं राजधर्मन्यतः ब्रतचारिणी राजमाता, तस्या आदेशेन राजधान्यां प्रत्यावर्तनरूपं पुत्रधर्मपालनम्। अर्थोद्योतनिकाटीकायामुक्तम्- 'कार्ययोर्मनसो द्वैधीभवनं नामैकत्रापर्यवसानम्। उपमाने तु मार्गद्वयगमनम्। .....पुरोऽग्रे शैले प्रतिहतमवरोधं प्राप्तं स्रोतोवहो नद्याः स्रोत इव'।[20] राज्ञः दुष्यन्तस्य द्विधाग्रस्तस्य मनसः चाञ्चल्यमसहायता चोपमालंकारप्रयोगेण स्पष्टरूपेण व्याख्यातमत्र ।

**तृतीयाङ्कः**
तृतीयाङ्के चतुर्विंशति श्लोकाः विद्यन्ते। तत्र चतुर्थे श्लोके उपमालंकारप्रयोगः दृश्यते। ते यथा – ३/७, ३/९, ३/२१, ३/२४ संख्यकाः श्लोकाः।
तत्र प्रथमोपमायाः दृष्टान्तः यथा –

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा।
शोच्या च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी।।[21]

श्लोकेऽत्र दुष्यन्तं प्रत्यनुरक्ता मदनसन्तप्ता शकुन्तलोपमेया, वायुना ताड़िता शुष्का माधवीलता च उपमानात्र। अन्तरालेऽवस्थाय दुष्यन्तः शकुन्तलां दृष्टवान्। तस्य दृष्ट्या सा क्लान्तेति प्रतीयते। तां दृष्ट्वा राजाचिन्तयत् – तस्याः लावण्यं हरति मदनः। मदनपीड़ितायाः शकुन्तलायाः तुलना क्रियते निदाघस्य वायोराघातेन लावण्यहीनया शुष्कया माधवीलतया सह। अनया वर्णनयोपमालंकारोऽत्र।
द्वितीयोपमायाः निदर्शनं यथा –

स्मर एव तापहेतुर्निर्वापयिता स एव मे जातः।
दिवस इवाभ्रश्यामस्तपात्यये जीवलोकस्य।।[22]

[14] तदेव, १/३१
[15] तदेव, २/४
[16] तदेव,२/७
[17]तदेव,२/८
[18] तदेव,२/१५
[19] तदेव, २/१७
[20] तदेव, २/१७, राघवभट्टकृता अर्थद्योतनिकाटीका
[21] तदेव, ३/७
[22] तदेव, ३/९

रहसि दुष्यन्तः शकुन्तलायाः मनोगता वासनावगतः सन् मन्तव्यमिदमकरोत्। उभयोर्मानसिकावस्था तुल्या च। अतः दुष्यन्तेनोक्तं – यः मदनः तापहेतुः पुनः सोऽपि तापनिर्वापयिता च। शकुन्तलानुरागविषये ज्ञात्वा दुष्यन्त अनुभवति यत्- तापहेतुकर्ता मदन अधुना तस्य तापं प्रशमयति। अत्र मेघाच्छन्नः दिवा सह मदनेन तापप्रशमनरूपकर्मणः तुलनावशादुपमालंकारः।
तृतीयोपमायाः दृष्टान्तः यथा-

अपरीक्षतकोमलस्य यावत्कुसुमस्येव नवस्य षट्पदेन।
अधरस्य पिपासता मया ते सदयं सुन्दरि गृह्यते रसोऽस्य।।[23]

अत्र नवकुसुमेन सह नायिकाया अधरस्य, षट्पदेन सह नायकस्य सादृश्यकथने उपमा स्यात्।
अङ्कस्य अन्तिमोपमा यथा –

सायन्तने सवनकर्मणि संप्रवृत्ते वेदीं हुताशनवतीं परितः प्रयस्ताः।
छायाश्चरन्ति वहुधा भयमादधानाः संध्यापयोदकपिशाः पिशिताशनानाम्।।[24]

कण्वाश्रमस्य मुनेरनुरोधेन राक्षसहस्तात् यज्ञरक्षणार्थं नृपः दुष्यन्तः पुनराश्रमे आगतवान्। सायं यज्ञारम्भक्षणे राक्षसाः यज्ञध्वंसार्थं किमकरोन् तस्य वर्णनाप्रसङ्गेनोपमालंकारस्य व्यवहारः दृश्यते। श्लोकेऽस्मिन् मेघेन सह राक्षसानां तुलनाकथनादुपमालंकारः। पिङ्गलवर्णोऽत्र साधारणधर्मः।

**चतुर्थाङ्कः**
आलोच्यमानेऽङ्के द्विविंशतिसंख्यकाः श्लोका विद्यन्ते। अङ्केऽस्मिन् श्लोकत्रये उपमालंकारोऽस्ति। ते यथा – ४/४, ४/५, ४/७।
तत्र प्रथमोपमाप्रयोगस्य दृष्टान्तर्यथा –

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव।।[25]

शकुन्तला सन्तानसम्भवेति संवादज्ञापकः श्लोकोऽयम्। अत्रापन्नसत्त्वां शकुन्तलां शमीवृक्षेण सह तुलना क्रियते। शमीकाष्ठः यथाग्निगर्भः तथैव शकुन्तलापि राजचक्रवर्त्तिलक्षणयुक्तस्य तेजस्विसन्तानस्य धात्रीति- ईदृशी तुलना क्रियते। शमी यथा अग्नेः जन्मदात्री तथैव शकुन्तलापि तेजस्विसन्तानस्य भावी जन्मदात्रीति उक्तेः तात्पर्यम्। अतएवात्रोपमालंकारः।
द्वितीयोपमा दृश्यते यथा –

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित्।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै –
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः।।[26]

पतिगृहे प्रेषणार्थं सखिभिः यदा शकुन्तलामलंक्रियन्ते तदा वनदेवैः तां सुसज्जयितुं भूषणानि, क्षौमवस्त्रमलक्तकमश्च द्रव्याणि प्रदत्तानि। अत्र नवपल्लवनिर्गमणेन सह देवतानां हस्तनिर्गमणस्य तुलना लभ्यते। एतादृशसादृश्यकथनादुपमालंकारः।
अङ्कस्यास्य अन्तिमोपमा दृश्यते, शकुन्तलां प्रति पितुः कण्वस्याशीर्वाण्यां तथाचोक्तम् –

ययातेरिव शर्मिष्ठा भर्तुर्वहुमता भव।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि।।[27]

पतिगृहे प्रेषणस्य पुर्वक्षणे पितुः कण्वस्याशीर्वाणी यथा – शर्मिष्ठा यथा तस्याः पतिं निकषा वहुमतादरिणी च आसीत् तथैव त्वमपि पत्युः सकाशे आदरिणी भवेति भावः। अत्र शर्मिष्ठया सह शकुन्तलां सादृश्यकथने उपमेति।

**पञ्चमाङ्कः**
अङ्केऽस्मिन् एकत्रिंशत् श्लोकाः सन्ति। तेषु उपमानां प्रयोगः दृश्यन्ते यथाक्रमेण – ५/५, ५/६, ५/१३, ५/१९, ५/२०, ५/२१ च षट्संख्यके श्लोके।
पञ्चमाङ्कान्तर्गतस्य प्रथमोपमाप्रयोगः दृश्यते यथा-

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवते श्रान्तमना विविक्तम् ।
यूथानि संचार्य रविप्रतप्तः शीतं दिवा स्थानमिव द्विपेन्द्रः।।[28]

आलोच्यमाने श्लोके राजधर्मपालकस्य राज्ञः तुलना क्रियते हस्तीदलपतिना सह। राजा यथा प्रजान् तन्त्रयित्वा सायाह्ने विजनस्थाने विश्रमति तथैव द्विपेन्द्रः गजराजः यूथानि चारयित्वा क्लान्तः सन् सुशीतले स्थाने विश्रामं लभते। अत्र तयोरेकमेव कर्मेति वर्णनार्थं कविनेदमुक्तम् । अत्र उपमेयः दुष्यन्तः द्विपेन्द्रश्च उपमानः। तयोः सादृश्यवाच्यत्वादुपमालंकारः।
द्वितीयोपमा यथा –

औत्सुक्यमात्रमवसाययति प्रतिष्ठा क्लिश्नाति लब्धपरिपालनवृत्तिरेव।
नातिश्रमापनयनाय यथा श्रमाय राज्यं स्वहस्तधृतदण्डमिवातपत्रम्।।[29]

श्लोकेऽस्मिन् राजवृत्तिविषये आलोचना दृश्यते। राजधर्मपालनरूपकर्म अतीव कष्टसाध्यमेवेति भावः। अतः राज्ञः दुष्यन्तस्येतादृशं श्रमसाध्यं कर्म परिश्रमदायकमिति। 'किमिव यथा स्वहस्ते धृतो दण्डो यस्य तदातपत्रं छत्रमिवेति'।[30] द्वयोः कर्माणि क्लेशकरत्वादिति भावः। अत्राप्युपमालंकारः।
तृतीयोपमा यथा –

का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् ।।[31]

पञ्चमाङ्कान्तर्गतः श्लोकोऽयमतीव गुरुत्वपूर्णः। दुर्वासाभिशापेन राजा स्मृतिभ्रष्टोऽभवत्। राजसभायां यदा शकुन्तलया सह कण्वशिष्यः शार्ङ्गरवः श्वारद्वतः माता गौतमी चागतवन्तः। तदा अवगुण्ठनवतीं

[23] तदेव, ३/२१
[24] तदेव, ३/२४
[25] तदेव, ४/४
[26] तदेव, ४/५
[27] तदेव, ४/७
[28] तदेव,५/५
[29] तदेव, ५/६
[30] तदेव, ५/६, राघवभट्टकृता अर्थद्योतनिकाटीका
[31] तदेव, ५/१३

शकुन्तलामवलोक्य नृपः दुष्यन्तः मनस्यचिन्तयत् – का एषा रमणी? यस्याः लावण्यमीषत् प्रकाशितमभवत्। साक्षात् पाण्डुपत्राणां किशलयमिव। अत्र शकुन्तला किशलयेन सह मुनिद्वयं माता गौतमी च पाण्डुपत्रैः सहोपमीयते। अस्मिन् सादृश्यकथने उपमा भवेदिति भावः।
चतुर्थोपमायाः निदर्शनं यथा –

इदमुपनतमेवं रूपमक्लिष्टक्लान्ति
प्रथमपरिगृहीतं स्यान्न वेत्यव्यवस्यन् ।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न च खलु परिभोक्तुं नापि शक्नोमि हातुम् ।।[32]

अत्र दुर्वासाशापेन विगतस्मृतिः नृपः दुष्यन्तः शकुन्तलां पत्नीरूपेण स्मर्तुमसमर्थः सन् तां ग्रहीतुं शक्नोति न वेति विषये द्विधाग्रस्तोऽभवत्। एमतावस्थायां स आत्मानं भ्रमरेण सहोपमीयते, यः प्रभाते हिमाच्छादनवशात् कुन्दकुसुमस्य मधु पातयितुमसमर्थोऽभवत्। भ्रमर इव राजापि स्मृतिभ्रष्टात् शकुन्तलां ग्रहीतुं न शक्नोति। अतएव भ्रमरेण सह राज्ञः साम्यावस्थाकथनादुपमालंकारः। वस्तुतस्तु अनया वर्णनया राज्ञः मानसिकद्वन्द्वरेव प्रकाशितोऽभवत्।
पञ्चमोपमा यथा –

कृताभिमर्शामनुमन्यमानः सुतां त्वया नाम मुनिर्विमान्यः।
मुष्टं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन ।।[33]

स्मृतिभ्रष्टः नृपः दुष्यन्तः शकुन्तलां पत्नीरूपेण ग्रहीतुमस्वीकृतः सन् कण्वशिष्येषु प्रधानः शाङ्गर्रवः तं धिक्कारं प्रदायेदमुक्तवान्। स नृपं दस्युना सह तुलना क्रियते। राज् अमानविकमाचरणमवगन्तुमेतादृशं व्याख्यानमत्यन्तमेव प्रासङ्गिकम्।
अङ्कस्यास्य अन्तिमोपमा यथा –

व्यपदेशमाविलयितुं किमीहसे जनमिमं च पातयितुम्।
कूलंकषेव सिन्धुः प्रसन्नमम्भस्तटतरुं च ।।[34]

शकुन्तला यदा तयोः विवाहविषये राज्ञः पूर्वस्मृतिमूत्पादयितुं चेष्टितवती, तदा तां तिरस्कृत्य राजा इदमुक्तवान्। तेनोक्तम् – यथा कूलंकषा सिन्धुर्नदी अम्भो यथा कलुषयति तटतरुञ्च पातयति तथैव मत्सदृशं जनं पातयितुं तथा मम कुलं कलङ्कयितुं कथं चेष्टसे। अत्र निन्दार्थे ईदृशी तुलना क्रियते। कूलंकषा सिन्धुरिव शकुन्तलापि कुल कलङ्किनीति सादृश्यकथने उपमालंकारः। बस्तुतस्त्वत्र शकुन्तलां प्रति राज्ञः दुष्यन्तस्य तीव्रघृणा प्रकाशितासीत्।

**षष्ठाङ्कः**
अस्मिन्नङ्के द्वात्रिंशत् संख्यकाः श्लोका विद्यमाना सन्ति। तेषूपमाप्रयोगाः दृश्यन्ते यथाक्रमेण -६/७, ६/९ ६/११, ६/१४ ,६/२४ च पञ्चसंखके श्लोके।
अङ्केऽस्मिन् शापमुक्तः नृपः दुष्यन्तः शकुन्तलाविषयकं स्मृतिं पुनर्लब्ध्वा विविधरूपेण विलापं कृतवान्। तस्य मनोभाव विविधैरुपमाप्रयोगैः प्रकाशितोऽभवत्। येन विरहघनं परिवेशं सृष्टवान् कविः कालिदासः।
षष्ठाङ्के प्रथमोपमा यथा –

प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम् ।
अनुशयदुःखायेदं हतहृदयं सम्प्रति विबुद्धम्।।[35]

षष्ठाङ्कान्तर्गते सप्तमे श्लोके नृपः दुष्यन्तः खेदं प्रकाश्योक्तवान् – सारङ्गाक्ष्या शकुन्तलया प्रतिबोध्यमानमपि अहं सुप्तोऽभवम् मोहमुपागतम्। वर्तमाने प्रतिबुद्धे जाग्रते सति तद्विषयमनुस्मरन्नहं नितरां खेदमनुभवामि। अत्रोपमेयः शकुन्तला उपमानञ्च सारङ्गाक्षी तथा मृगनयना। मृगनयने सदृशे नयने यस्याः सेति। अतएवात्रोपमालंकारः स्यात् । अपि च अत्र त्रिलुप्तोपमालंकारः दृश्यते। यत्र केवलमेव उपमानमुपस्थितमपरङ्गान्यनुपस्थितानि।
द्वितीयोपमा यथा –

इतः प्रत्यादेशात्स्वजनमनुगन्तुं व्यवसिता
स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे।
पुनर्दृष्टि बाष्पप्रसरकलुषामर्पितवती
मयि क्रूरे यत्तत्सविषमिव शल्यं दहति माम्।।[36]

नृपेण प्रत्याख्यातायाः शकुन्तलायाः मानसिकावस्था , तस्याभिर्व्यक्तिर्वा शकुन्तलायाः नयने कीदृशं प्रकाशितमभवदिति व्याख्याप्रसङ्गेन दुष्यन्तेनिदमुक्तम्। अन्तिमे चरणद्वये सोऽवदत्- एकतः शकुन्तलायाः साश्रुपूर्णा दृष्ट्यासीत्, अन्यतः तस्याः कठोरदृष्टिः विषमिव तं विद्धमकरोत्। शकुन्तला तस्याः कठोरदृष्ट्या राजानं धिक्कारं कृतवतीत्यनुभूयेदानीं राजा नायिकायाः दृष्टिं सविषमस्त्रप्रयोगतुल्यमिति कथितवान्। एतादृशे सादृश्यकथने उपमालंकारः।
तृतीयोपमायाः दृष्टान्तर्यथा -

तव सुचरितमङ्गुलीय नूनं प्रतनु ममेव विभाव्यते फलेन।
अरुणनखमनोहरासु तस्याश्च्युतमसि लब्धपदं यदङ्गुलीषु।।[37]

राज्ञा दुष्यन्तेन शकुन्तलां यमभिज्ञानमङ्गुरीयकं प्रदत्तम्, तद् पुनर्दर्शनेन स शापमुक्तोऽभवत्। शकुन्तलायाः प्रत्याख्यानकाले तद् अङ्गुरीयकं तस्याः हस्तात् च्युतोऽभवत्। तस्मात् कारणात् शकुन्तला प्रत्याख्याता जाता। इदानीमङ्गुरीयकं पुनर्लब्ध्वा पूर्वस्मृतिः जागरिते सत्यनुतप्तः नृप अङ्गुरीयकं तिरस्कृतवान् यत् – ममेव तव पुण्यं स्वल्पं यतः त्वमपि तस्याः हस्तात् विच्युतोऽभवत्। विरही राजा यथा शकुन्तलाविहीनः तथैवाङ्गुरीयकमपि शकुन्तलासङ्गविहीनम्। द्वयोः साम्यावस्थावर्णनायामुपमा।
चतुर्थोपमा यथा-

संरोपितेऽप्यात्मनि धर्मपत्नी त्यक्ता मया नाम कुलप्रतिष्ठा।
कल्पिष्यमाना महते फलाय वसुन्धरा काल इवोप्तबीजा।।[38]

आलोच्यमाने श्लोके दुष्यन्तस्य भावी वंशधरधारणकारिणीं शकुन्तलां स्वर्णगर्भया पृथिव्या सह तुलना क्रियते। अत्र स्वर्णगर्भया पृथिव्या सह शकुन्तलायाः तुलनाकथने उपमालंकारोऽभवत्।
पञ्चमोपमा यथा-

एष त्वामभिनवकण्ठशोणितार्थी शार्दूलः पशुमिव हन्मि चेष्टमानम्।

---

[32] तदेव, ५/१९
[33] तदेव, ५/२०
[34] तदेव, ५/२१
[35] तदेव, ६/७
[36] तदेव, ६/९
[37] तदेव, ६/११
[38] तदेव, ६/२४

आर्तानां भयमपनेतुमात्तधन्वा दुष्यन्तस्तव शरणं भवत्विदानीम् ।।[39]

श्लोकोऽयं नेपथ्यात् केनचिदुक्तम्। विदुषकमाक्रम्य स इदमुक्तवान्। व्याघ्रः यथा रक्तपिपासुः सन् पशुं हन्ति तथैव अहमपि अधुनैव हन्मीति। आत्मानं व्याघ्रेण सह तुलनावशादत्रोपमालंकारः।

**सप्तमाङ्कः**

अभिज्ञान-शकुन्तलमिति नाटकस्य सप्तमे तथा अन्तिमेऽङ्के पञ्चत्रिंशत् संख्यकाः श्लोकाः विद्यन्ते। एतेषां षट्संख्यके श्लोके उपमालंकारप्रयोगः दृश्यते। ते यथा – ७/३, ७/१५, ७/१६, ७/१७, ७/१८, ७/३२ संख्यकाः श्लोकाः।

अङ्कस्यास्य प्रथमोपमा यथा-

सुखपरस्य हरेरुभयैः कृतं त्रिदिवमुद्धृतदानवकण्टकम्।
तव शरैरधुना नतपर्वभिः पुरुषकेसरिणश्च पुरा नखैः।।[40]

इन्द्रस्याहवानेन नृपः दुष्यन्तः तं साहाय्यार्थं देवलोकेऽगच्छत्। इन्द्रदूतः मातलिः नृपं प्रशंसितवानालोच्यमाने श्लोके। अत्रोक्तं – नृसिंहावताररूपेण भगवान् विष्णुः यथा तस्य नखप्रहारेण हिरण्यकशिपुं निहत्य देवान् रक्षितवान् , तथैव दुष्यन्तोऽपि तस्य वाणेन देवसमूहं रक्षितवान्। अत्र दुष्यन्तं विष्णुना सह तुलनावशादुपमालंकारः।

द्वितीयः दृष्टान्तर्यथा –

महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे।
स्फुलिङ्गावस्थया बह्निरेधापेक्ष इव स्थितः।।[41]

स्वर्गात् प्रत्यावर्तनकाले पथि मारीचाश्रमं प्रविश्य वालकं सर्वदमनमवलोक्य राज्ञः पुत्रस्नेहः जागरितोऽभवत्। स अपश्यत्- वालकः सिंहशिशोः केशरमुत्पाटयितुं सचेष्टोऽभवत्। स वालकः राज्ञः दृष्ट्या अग्निस्फुलिङ्ग इव प्रतिभाति। अत्राग्निस्फुलिङ्गेन सह सर्वदमनस्य सादृश्यकथने उपमा भवति।

तृतीय-चतुर्थोपमा च यथा –

प्रलोम्भवस्तुप्रणयप्रसारितो विभाति जालग्रथिताङ्गुलिः करः।
अलक्ष्यपत्रान्तरमिद्ध रागया नवोषसा भिन्नमिवैकपङ्कजम्।।
आलक्ष्यदन्तमुकुलाननिमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन्।
अङ्काश्रयप्रणयिनस्तनयान्वहन्ती धन्यास्तदङ्गरजसा मलिनीभवन्ति।।[42]

अज्ञातपरिचयं वालकं दृष्ट्वा राज्ञः पितृस्नेहः जागरितोऽभवत्। सिंहशिशुपीड़नकाले स नृपः शिशोः हस्ते राजचक्रवर्त्तीलक्षणं दृष्टवान्। तस्य रक्तिमः करतल उपमेयात्र उपमानञ्च नवविकशितं पद्मम्। उभयोः सादृश्यवाच्यत्वादुपमालंकारः। अपि च शिशोः दन्तान् कुन्दपुष्पस्य मुकुलैः सहोपमीयते। अनवद्योपमाप्रयोगेनात्र वस्तुतस्तु राज्ञः पितृस्नेहः पुनर्जाग्रतोऽभवत्। तस्य आवेगः प्रकाशितोऽभवदुपमालंकारेण।

पञ्चमोपमा यथा

एवमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मतस्त्वया।
सत्त्वसंश्रय सुखोऽपि दूष्यते कृष्णसर्पशिशुनेव चन्दनः।।[43]

तापस्यनुरोधेन राजा दुष्यन्तः सर्वदमनं निकषा गत्वावदत् –'भो मुनिपुत्र! कथं त्वमाश्रविरुद्धं कर्म करोसि। कृष्णसर्पः यथा चन्दनवृक्षं दूषयति तथैव तवाचरणमपि आश्रमपरिवेशं दूषयति'। अत्र कृष्णसर्पेण सह सर्वदमनमुपमीयते। अतएवात्रोपमा।

अन्तिमाङ्कस्यान्तिमोमुपमालंकारयुक्तः श्लोकः –

शापादसि प्रतिहता स्मृतिरोधरूक्षे भर्तर्यपेततमसिप्रभूता तवैव।
छाया न मूर्छति मलोपहतप्रसादे शुद्धे तु दर्पणतले सुलभावकाशा।।[44]

नाटकस्यान्तिमांशे घटनाक्रमेण मारीचाश्रमे सपुत्रः शकुन्तलया सह दुष्यन्तस्य पुनर्मिलनमभवत्। तस्मिन् शुभक्षणे महर्षिः मारीचः शकुन्तलामुपदिष्टवान् – अभिशापवशात् तव स्वामिनः स्मृतिलोप अभवत्। तस्मात् स तां प्रत्याख्यातवान्। अधुना तस्य मोहः दूरीभूतः। इदानीं तवैव कर्तृत्वं विद्यते। दर्पणे यदि मालिन्यं स्यात् तर्हि तस्मिन् प्रतिच्छविः स्पष्टरूपेण प्रकाशितो न भविष्यति, अपि तु निर्मलदर्पणे तद् स्पष्टः स्यात्। तथैव अभिशापमुक्तस्य राज्ञः बुद्धि अधुना मालिन्यहीना, अतएव तस्मिन् केवलमेव तव छाया पतिष्यतीति। अत्र स्मृतिभ्रष्टस्य राज्ञः बुद्धिं मलिनदर्पणेन सह तुलना क्रियते। पुनः स्मृतिप्राप्ते सति तस्य बुद्धिः स्वच्छदर्पणेन सह तुलनापि क्रियते। अतएवात्रोपमालंकारो भवति।

**शोधसिद्धान्तः**

उपसंहाररूपेण वक्तुं शक्यते – समग्रेऽभिज्ञान-शकुन्तलमिति नाटके उपमालंकारव्यतिरिक्तं अनुप्रासः, स्वभावोक्ति, उत्प्रेक्षा, परिकर, अर्थान्तरन्यास, विभावना, विशेषोक्तिः इत्यादिनामलंकाराणां व्यवहारः दृश्यते । तन्मध्ये उपमालंकारप्रयोगे कालिदासस्य नैपुण्यं विशेषतया परिलक्ष्यते। यद्यप्युमायुक्तानां श्लोकानां प्रयोगः नाधिकः, तथापि गुणगतमानानुसारेण तेऽतीवोत्तमाः। अतः उपमाप्रयोगे कवेः कालिदासस्य ख्यातिः सर्वाधिकेव। यथायथोपमाप्रयोगे कालिदासतुल्यं नैपुण्यमपरेषां कवीनां रचनासु विशेषतया न परिलक्ष्यते। हेतुनानेनोपमाप्रयोगनैपुण्ये कालिदासः सर्वोत्तमः। प्रशंसावाक्यरूपेण तथोक्तम्- 'उपमा कालिदासस्य'।

**सहायकग्रन्थाः**


1. चक्रवर्ती, सत्यनारायण(सम्पादक); *अभिज्ञानशकुन्तलम्*, संस्कृत पुस्तक भाण्डार, कलकाता, द्वितीय संस्करण , १९९२
2. चट्टोपाध्याय, जयश्री *; अलंकार साहित्येर समृद्ध इतिहास*, संस्कृत पुस्तक भाण्डार, कलकाता, तृतीय परिवर्तित संस्करण, १४२० वङ्गाव्द
3. दाशगुप्त, सुधीरकुमार; *काव्यालोक*, दे'ज पावलिशिं, कलकाता, प्रथम संस्करण, १९९८


[39] तदेव, ६/२७

[40] तदेव, ७/३

[41] तदेव, ७/१५

[42] तदेव, ७/१६-१७

[43] तदेव, ७/१८

[44] तदेव, ७/३२

4. पाल, विपदभञ्जन; *अलंकारविचिन्ता(साहित्यदर्पण-दशम परिच्छेद),* संस्कृत पुस्तक भाण्डार, कलकाता, द्वितीय संस्करण ,१४०८ वङ्गाव्द
5. वन्द्योपाध्याय, धीरेन्द्रनाथ; *संस्कृत अलंकारशास्त्र तत्त्व ओ समीक्षा,* पश्चिमवङ्ग राज्य पुस्तक पर्षद्,कलकाता, प्रथम प्रकाश, २०१२
6. वन्द्योपाध्याय,सुरेशचन्द्र; *कालिदाससमीक्षा,* मनीषा, प्रथम प्रकाश, १९९६
7. मुखोपाध्याय, विमलाकान्त(सम्पादक); *साहित्यदर्पण,* संस्कृत पुस्तक भाण्डार, कलिकाता, द्वितीय संस्करण, २०१३
8. मुखोपाध्याय, रमारञ्जन; *रससमीक्षा,* संस्कृत पुस्तक भाण्डार, कलकाता, प्रथम प्रकाश, १३६८ वङ्गाव्द
9. Kale, M.R. (ed.); *The Abhijñānaśakuntalam of Kālidasa,* Booksellers Publishers Co. Bombay, 9th ed. 1961